# A-II/1/1390/21

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## जैनदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे प्रश्ना: समाधेया:।** **(15×2=30)**

1. रत्नकरण्डश्रावकाचारस्य कर्त्ता क:? कदा च जात:?
2. 'धर्मेश्वरा: धर्मं विदु:' इत्यस्य कोऽर्थ:? स्पष्टयत।
3. पाठ्यग्रन्थदिशा आप्तता प्रतिपाद्यताम्।
4. त्रिमूढापोढमष्टाङ्गं इति पदं कस्य विशेषणं ख्याति? स्पष्टयत।
5. "यदीयप्रत्यनीकानि भवन्ति भवपद्धति:" इत्यस्य कोऽर्थ:?
6. साधु कुतो हेतो: चरणं प्रतिपद्यते?
7. सत्याणुव्रतं किमुच्यते? स्पष्टयत।
8. सत्याणुव्रतस्य अतिचारा: के निरूप्यन्ते?
9. मातङ्ग: कस्मिन् व्रतपालने पूजातिशयं प्राप्तवान्?
10. अपध्यानं किमुच्यते तच्च कथं हि अनर्थदण्ड: स्यात्?
11. "स्वरूपस्थ: पुरं याति देही देहान्तरस्थिति:" इति वाक्यं स्पष्टयत।

    **अथवा**

    "भुज्यते स्वर्भुवं सौख्यं मृत्युभीति: कुत: सताम्" इति वचनं विशदयत।
12. सल्लेखनाव्रतस्य पञ्चातिचारा: ज्ञापनीया:।

    **अथवा**

    "निरतिशया निरवधयो नि:श्रेयसमावसन्ति सुखम्" इत्यस्य कोऽर्थ:?
13. निरतिक्रमणमणुव्रतपञ्चकमपि शीलसप्तकं च धारयते, क:?

    **अथवा**

    रात्रिमुक्तिविरत: कथं भवति?

14. "सुतमिव जननी मां शुद्धशीला भुनक्तु" इति वचनं स्पष्टयत।

**अथवा**

"सुखमिव सुखभूमिः कामिनं कामिनीव" इति कथं प्रोक्तम्?

15. "जिनभक्ताः स्वर्गे चिरं रमन्ते" इति वचनं ग्रन्थकृता कुत्र प्रकरणे? केषाञ्च कृते निरूपितम्?

**अथवा**

सम्यग्दर्शनस्य माहात्म्यं वाक्यद्वयेन प्रदर्शयत।

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. अन्यूनमनतिरिक्तं याथातथ्यं विना च विपरीतात्। निस्सन्देहं वेद यदाहुस्तज्ज्ञानमागमिनः॥"
–इति वचनं सप्रसङ्गं व्याख्यात।

17. "न धर्मो धार्मिकैर्विना" इति शास्त्रवचनं स्वसंस्कृतगिरा विशदयत?

18. सम्यक्त्वविनाशकाः मदाः कति? के च? निरूपयितव्याः।

**अथवा**

ब्रह्मचर्याणुव्रतस्य पञ्च अतिचाराः ग्रन्थदिशा निरूपणीयाः।

19. देशावकाशिकं नाम शिक्षाव्रतं निरूप्य तदन्यत्र कुतो हेतोः गुणव्रतेषु पठितं? स्पष्टयत।

**अथवा**

सल्लेखनाव्रतं किं कस्य वा भवति? सुविशदयत।

20. सचित्रत्यागव्रतं महत्त्वं भजते कुतः कश्च सचित्रविरतो दयामूर्तिः प्रज्ञप्ता?

**अथवा**

सल्लेखनायाः पञ्च अतिचाराः निरूपणीयाः।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. श्रावकस्यैकादशपदानि प्रतिमापदभाज्यानि।

**अथवा**

रत्नत्रयेषु सम्यक्त्वस्य महत्त्वम्।

**अथवा**

रत्नकरण्डश्रावकाचारस्य दार्शनिकमवदानम्।

# A-II/2/1391/21

## तृतीयसत्रार्द्धम्

## द्वितीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. समयसारग्रन्थं कः आचार्यः लिखितवान्?
2. समयसारस्य तात्पर्यवृत्तिटीका केन आचार्येण लिखिता?
3. समयसारस्य मङ्गलाचरणं लिखत।
4. समयस्य के भेदाः आचार्येण समयसारे उक्ताः?
5. निश्चयनयः भूतार्थो वा अभूतार्थो वा?
6. अप्रतिबुद्धः अज्ञानी वा कः जीवः भवति?
7. क्षीणमोहः साधुः कः भवति?
8. 'उवओग एव अहमेक्को' अस्यार्थं लिखत।
9. आचार्येण जीवस्य किं स्वरूपं ग्रन्थे प्रोक्तम्?
10. एकेन्द्रियजीवाः के सन्ति?
11. जीवस्य वर्णादयः केन नयेन भवन्ति?

**अथवा**

चतुरिन्द्रियजीवाः के भवन्ति?

12. तात्पर्यवृत्तिटीकायाः मङ्गलाचरणं लिखत।

**अथवा**

'समय' अस्य शब्दस्य कः अर्थः वर्तते?

13. 'समओ सत्वत्थ सुंदरो लोड' अस्यार्थः लेखनीयः।

**अथवा**

व्यवहारनयः कः भवति?

14. 'वंदित्तु सव्वसिद्धे' इति कथनं स्पष्टयत।

**अथवा**

'जो पस्सदि अप्पाणं' अस्यार्थः लेखनीयः।

15. 'णत्थि मम को वि मोहो' गाथांशस्य अर्थं लिखत।

**अथवा**

'णत्थि मम धम्मआदी' अस्यार्थं स्पष्टयत।

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. आत्मनः जीवस्य वा किं - किं वैशिष्ट्यम् आचार्येण ग्रन्थे लिखितम्? स्पष्टयत।

17. समयसारग्रन्थस्य परिचयः देयः।

18. पञ्चेन्द्रियजीवान् ग्रन्थदिशा स्पष्टयत।

**अथवा**

शुद्धस्य जीवस्य स्वभावं वर्णयत।

19. एकस्याः गाथायाः व्याख्यां कुरुत।

(क) जो मोहं तु जिणित्ता णाणसहावाधियं मुणइ आदं।
तं जिदमोहं साहुं परमट्टवियाणया विंति॥

**अथवा**

(ख) गंधरसफासरूवा देहो संठाणमाइया जे य।
सव्वे ववहारस्स य णिच्छयदण्हू ववदिसंति॥

20. एकस्याः गाथायाः व्याख्या कार्या -

(क) मोहण कम्मस्सुदया दुवण्णिया जे इमे गुणट्ठाणा।
ते कह हवंति जीवा जे णिच्चमचेदणा उत्ता॥

**अथवा**

दंसणणाणचरित्ताणि सेविदव्वाणि साहुणा णिच्चं।
ताणि पुण जाण तिण्णिवि अप्पाणं चेव णिच्छयदो॥

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. ग्रन्थदिशा निश्चयव्यवहारनययोः वर्णनं कुरुत।

**अथवा**

कुन्दकुन्दाचार्यस्य व्यक्तित्वं कृतित्वञ्च वर्णयत।

# A-II/3/1392/21

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. "स्याद्वादमंजरी" इत्यस्य कोऽर्थः।

**अथवा**

'स्याद्वादमंजरी' इति मूलग्रन्थः टीकाग्रन्थो वा?

2. "अनन्तवस्तुविषयम्" इत्यनेन किं तात्पर्यम्?

**अथवा**

धर्मतीर्थप्रवर्तकः किं प्राप्नोति?

3. अनन्तविज्ञानविशेषणेन किं तात्पर्यम्?

4. प्रथमकारिकायां प्रयुक्तः "श्रीवर्धमानं" इत्यनेन किं तात्पर्यम्?

5. जैनसिद्धान्ते कति अतिशयः स्वीकृतः?

6. अनन्तज्ञानेन किं तात्पर्यम्?

**अथवा**

अनन्तदर्शनेन किं तात्पर्यम्?

7. कुतीर्थिकाः इत्यनेन किं तात्पर्यम्?

8. पुण्यलाभः कः भवति?

9. पदार्थस्य स्वरूपं किं?

10. पांतजलयोगमतीः वस्तु कथं स्वीकरोति?

**अथवा**

सांख्यमतीः पदार्थान् कथं स्वीकरोति?

11. संयोगसम्बन्धः कुत्र भवति?

**अथवा**

हितोपदेशकः कोऽस्ति?

12. "कुहेवाकविडम्बना" इत्यनेन किं तात्पर्यम्?
13. अन्ययोगत्यवच्छेदस्य अर्थः कः?
14. आप्तस्य लक्षणं किम्?
15. अर्हत् शब्दस्य किं तात्पर्यम्?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. मंगलाचरणं विलिख्य व्याख्या विधेया।
17. अनन्तविज्ञानमतीतदोषमबाध्यसिद्धान्तममर्त्यपूज्यम्।

    श्रीवर्धमानं जिनमाप्तमुख्यं स्वयम्भुवं स्तोतुमहं यतिष्ये॥ –व्याख्या विधेया।

    **अथवा**

    आदीपमाव्योम समस्वभावं स्याद्वादमुद्रानतिभेदि वस्तु।

    तन्नित्यमेवैकमनित्यमन्यदिति त्वादाज्ञाद्विषतां प्रलापाः॥ –व्याख्या विधेया।
18. जैनदर्शने पदार्थस्य स्वरूपं प्रतिपादनीयम्।
19. वैशेषिकमते पदार्थव्यवस्थां प्रतिपादयत।

    **अथवा**

    समवायस्वरूपं विशदयत।
20. नैयायिकमते प्रमेयस्य स्वरूपं लिखत।

    **अथवा**

    जातेः भेदान् लिखत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. ग्रन्थानुसारम् ईश्वरस्वरूपं समीक्षां च लिखत।

    **अथवा**

    जैनदर्शने मोक्षस्य स्वरूपं लिखत।

    **अथवा**

    अहिंसायाः स्वरूपं ग्रन्थदिशा लिखत।

# A-II/4/1393/21

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. 'अथप्राकृतम्' इति सूत्रेण किमभिधीयते?
2. 'आर्षम्' इति सूत्रेण किं तात्पर्यम्?
3. प्राकृते अस्वरं (स्वररहितं) व्यञ्जनं भवति न वा?
4. प्राकृतभाषायां चतुर्थीबहुवचनं भवति अथवा न भवति?
5. 'लुक्' इति सूत्रस्य प्रयोजनं विलिख्य अस्य उदाहरणमेकं लिखत।
6. 'अन्त्यव्यञ्जनस्य' इति सूत्रस्य उदाहरणमेकं देयम्।
7. 'मोनुस्वारः' इति सूत्रस्य एकम् उदाहरणं प्रदेयम्।
8. संस्कृतम् इति शब्दस्य प्राकृते किं रूपं भवति? अत्र को नियमः? लिखत।
9. 'इः स्वप्नादौ' इति सूत्रस्य किम् उदाहरणम्?
10. 'ओत्पद्मे' इति सूत्रस्य उदाहरणं किम्?
11. 'अव्ययेषु आदेशकारस्य अद् वा भवति' इति नियमस्य उदाहरणमेकं देयम्।

**अथवा**

'आचार्ये चोच्च' इति सूत्रस्य उदाहरणं प्रदेयम्।

12. 'मात्रटि वा' इति सूत्रस्य उदाहरणं देयम्।

**अथवा**

'ऋतोत्' इति सूत्रस्य उदाहरणं लिखत।

13. 'रिः केवलस्य' इति सूत्रस्य प्रयोजनं विलिख्य उदाहरणं देयम्।

**अथवा**

'सदृशः' इति शब्दस्य प्राकृतरूपं किं भवति?

14. 'ऐत एत्' इति सूत्रस्य उदाहरणं लेखनीयम्।

**अथवा**

'औत ओत्' इति सूत्रस्य उदाहरणं देयम्।

15. 'अवर्णो यश्रुतिः' इति सूत्रस्य उदाहरणमेकं लिखत।

**अथवा**

'टो डः' इति सूत्रस्य उदाहरणं किम्?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. 'स्त्रियामादविद्युतः' 'ङ-ञ-ण-नो व्यञ्जने' इति सूत्रद्वयस्य सोदाहरणं व्याख्यानं कुरुत।

17. 'ह्रस्वः संयोगे' 'ख-घ-थ-ध-भाम्' इति सूत्रद्वयस्य सोदाहरणं विवेचनं करणीयम्।

18. 'क-ग-च-ज-त-द-प-य-वां प्रायो लुक्' इति सूत्रस्य उदाहरणपूर्वकं व्याख्यानं कुरुत।

**अथवा**

'प्रत्यादौ डः', नो णः, 'आदेर्यो जः' इति सूत्रत्रयस्य सोदाहरणं विवेचनं कुरुत।

19. 'पो वः' 'श-षो सः' 'छोक्ष्यादौ' इति सूत्रत्रयस्य उदाहरणपूर्वकं व्याख्यानं कुरुत।

**अथवा**

'घ-य्य-र्यां जः' 'र्तस्याधूर्तादौ' इति सूत्रद्वयस्य सोदाहरणं विवेचनं कुरुत।

20. 'अतः सेर्डोः' 'ङसः स्सः' 'ह्रस्वोमि' इति सूत्रत्रयस्य व्याख्यानं सोदाहरणं कुरुत।

**अथवा**

'संख्याया आमो ण्ह ण्हं' 'चतुर्थ्याः षष्ठी' इति सूत्रद्वयं सोदाहरणं विवेचयत।

**स. एकः दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. प्राकृतभाषायाः साहित्यस्य च महत्त्वं प्रतिपादयत।

**अथवा**

प्राकृतभाषायाः सन्धिनियमाः लेखनीयाः।

**अथवा**

प्राकृतभाषायाः अस्मद्शब्दस्य रूपाणि सर्वासु विभक्तिषु लेखनीयानि।

# A-II/5/1394/21

## तृतीयसत्रार्द्धम्

## पञ्चमपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. वर्तमानसमये कस्य तीर्थङ्करस्य शासनं प्रचलति ?
2. जैनधर्मस्य मुख्याः कति सम्प्रदायाः सन्ति ?
3. जैनधर्मे दर्शने वा कालविभागः कथं कृतः ?
4. 'षट्खण्डागमः' ग्रन्थः केन आचार्येण रचितः ?
5. भगवतः महावीरस्य निर्वाणं कदा कुत्र च जातम् ?
6. श्वेताम्बरपरम्परानुसारेण कति आगमाः सन्ति ?
7. समन्तभद्राचार्यस्य समयः कः ?
8. स्याद्वादमञ्जरीग्रन्थः केन निबद्धः ?
9. षड्दर्शनसमुच्चयः कस्य आचार्यस्य ग्रन्थोऽस्ति ?
10. रत्नकरण्डश्रावकाचारग्रन्थस्य प्रतिपाद्यविषयः कः ?
11. परीक्षामुखसूत्रं केन लिखितम् ?

**अथवा**

परीक्षामुखसूत्रस्य टीकायाः नाम लिखत।

12. एकस्य जैनपुराणग्रन्थस्य नाम सूचयत।

**अथवा**

अमृतचन्द्राचार्यस्य रचनायाः नाम किम् ?

13. ज्ञानार्णवकारस्य नाम किम् ?

**अथवा**

गोम्मटसारग्रन्थस्य मुख्यः विषयः कः वर्तते ?

14. श्वेताम्बरपरम्पराया: शास्त्राणि कस्यां प्राकृतभाषायाम् अधिकानि सन्ति?

**अथवा**

समाधितन्त्रग्रन्थे वर्णितविषय: क: वर्तते?

15. द्वादशाङ्गश्रुतं केन रचितम्?

**अथवा**

तत्त्वार्थसूत्रे कति अध्याया: सन्ति?

**ब. सर्वे प्रश्ना: समाधेया:।** **(5×6=30)**

16. समयसारग्रन्थस्य महत्त्वं स्पष्टयत।

17. न्यायदीपिकाग्रन्थग्रन्थकारयो: परिचयं लिखत।

18. देवनन्दिपूज्यपादाचार्यस्य कृतित्वं व्यक्तित्वञ्च संक्षेपेण वर्णयत।

**अथवा**

द्वादशाङ्गानि संक्षेपेण वर्णयत।

19. अकलंकाचार्यस्य ग्रन्थान् सूचयत।

**अथवा**

धरसेनाचार्यस्य जैनशास्त्रसम्वर्द्धने किं योगदानम्? स्पष्टयत।

20. सूत्रशैल्या लिखितानां जैनशास्त्राणां संक्षेपेण परिचय: लेखनीय:।

**अथवा**

श्रावकाचारस्य प्रमुखग्रन्थानां महत्त्वं सूचयत।

**स. निबन्धात्मक प्रश्न: समाधेय:।** **(1×20=20)**

21. दिगम्बरश्वेताम्बरसम्प्रदायद्वये शास्त्रेषु किं भिन्नत्वं वर्तते? सूचयत।

**अथवा**

आचार्यहरिभद्रसूरे: व्यक्तित्वं कृतित्वञ्च विस्तरेण सूचयत।